ISSN 976-8645

# शाकटायनशब्दानुशासनस्य द्वितीयातत्पुरुषसमास सूत्राणां मिथः तौलनिकम् अध्ययनम्

**ना. वैद्य सुब्राह्मणयः**

*कूटशब्दाः* *सूत्रम्, अनुवृत्तिः, संख्या लाघवं, पदलाघवं, प्रमाणम्।*

***किं नाम व्याकरणं शब्दार्थः बहूनां व्याकरणानां सत्त्वं, बहुषु वैयाकरणेषु शाकटायनः अन्यतमः, शाकटायनस्य पाणिनेः अर्वाचीनत्वं कालश्च। पाणिनिव्याकरणे द्वितीयातत्पुरुष समासप्रकरणे षट् सूत्राणि वर्तन्ते। शाकटायने व्याकरणे पञ्च सूत्राणि। शाकटायनः स्वव्याकरणे पाणिन्यपक्षेया संख्यायां, पदे, मात्रायां च लाघवम् असम्पादयत्। प्रस्तुतेऽस्मिन् शोध प्रबन्धे विषयोऽयं चर्च्यते।***

वेदस्य षडङ्गान्युपकारकत्वेन वर्तन्ते इति सुप्रसिद्धमेव। पाणिनिना निजप्रणीतायां शिक्षायाम् अभाणि–

**छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[१]

तथा च वेदपुरुषस्य मुखमिति व्याकरणं स्मर्यते। किञ्च भाषयैव लोकव्यवहाराश्चलन्ति। यदि भाषा न स्यात् अमुष्मिन् लोके, तर्हि जगदिदं गाढतमसि निमज्जेत्। तदेतदुक्तं महाकविना दण्डिना।

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**[२]

तथा च हृदि विद्यमानान् भावान् श्रोतृभ्यः आविष्करणाय भाषामन्तरा अन्या काचित् साधना न दृष्टिपथायतेऽत्र। भाषैव वक्तृभ्यो भावबुभुत्साम् उपशामयति। सा च भाषा अपशब्दमलिम्ना रहिता शुद्धा च भवेत्। **एकः शब्दः सम्यक् ज्ञातः स्वर्गे लोके कामधुक् भवति**[३] इति श्रुतिश्च भाषास्वच्छतायाः माहात्म्यं निगदति।

अतः भाषाशुद्धये व्याकरणापेक्षा वरीवर्त्ति। व्याकरणज्ञाने मौढ्ये सति, न कश्चित् पुरुषः साधून् शब्दान् प्रयोक्तुं समर्थो भवति। किञ्च वेदस्य रक्षार्थं व्याकरणज्ञानं, तदर्थं व्याकरणाध्ययनम् अत्यावश्यकम्। तदुक्तं पतञ्जलिना निजप्रनिबद्धे महाभाष्ये–

ISSN 976-8645

**रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यक् वेदान् परिपालयिष्यति**[४] इति। वेदरक्षणप्रयोजनवत्त्वादेव व्याकरणस्य वेदाङ्गत्वं समर्थ्यते। व्याकरणशास्त्रस्य सन्ति इतोऽपि प्रयोजनानि। शक्तिग्रहोपि व्याकरणाद् समुपजायते। तथा च

**शक्तिग्रहो व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**[५]

शिष्टोक्तेषु शक्तिग्रहोपायेषु व्याकरणं प्रधानं स्थानं भजते। **ब्राह्मणेन निष्कारणकः षडङ्गो वेदोऽध्येयो ज्ञेयः**[६] इति महाभाष्यवचनात् व्याकरणस्य माहात्म्यं सुस्पष्टं ज्ञायते। अस्य महत्त्वं च केनचिदित्थं निगदितमस्ति–

**यद्यपि बहुनाधीषे पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्।।**[७]

धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः इत्यस्माभिः सर्वैर्विदितमेव। चतुर्षु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। सा मुक्तिः सर्वाभीप्सिता धर्माचरणाधर्मानाचरणाभ्यां संभवति। धर्माचरणायाधर्मानाचरणाय धर्माधर्मज्ञानम् अनिवार्यम्। धर्माधर्मज्ञानं वेदार्थावगमनेनैव सेत्स्यति। धर्माधर्मज्ञानस्य वेदविहितस्य वेदार्थज्ञानाधीनत्वात् वेदार्थज्ञानं परमावश्यकम्। वेदस्य शब्दराशिस्वरूपत्वात्, शब्दार्थज्ञानाधीनमस्ति वेदार्थज्ञानम्। अतः शब्दार्थज्ञानावाप्तये व्याकरणशास्त्रज्ञानम् अनिवार्यमस्ति। किञ्च साधुशब्दैरेव अर्थः प्रत्येतव्यः इति कारणाद् व्याकरणशास्त्रज्ञानं परमावश्यकम्। तथा च व्याकरणशास्त्रस्य पदसाधुत्वज्ञापनमेव मुख्यं प्रयोजनम्।

अस्य व्याकरणशास्त्रस्य **शब्दानुशासनम्**[८] इत्यपरं नाम चास्ति। वि, आङ् इत्येतदुपसर्गपूर्वकात्, **डुकृञ् करणे धातोः करणे ल्युटि** निष्पन्नोऽयं व्याकरणशब्दः। **वि इत्युपसर्गस्य विविच्य, विभज्य** इति वा अर्थः। **आङ् इत्युपसर्गस्य आसमन्तात्** इत्यर्थः। तथा च **विविच्य आसमन्तात् निष्पद्यन्ते शब्दाः अनेन** अर्थात् **व्याक्रियन्ते शब्दाः अनेन इति व्याकरणम्** इति सिद्धम्। व्याक्रियन्ते शब्दाः अनेन इति करणव्युत्पत्त्या असाधुशब्देभ्यो पृथक्कृत्य साधुशब्दज्ञापनमेव क्रियते व्याकरणेन। एतावता व्याकरणाध्ययनस्यानिवार्यता प्रसाधिता।

इदानीं काले तु पाणिनिव्याकरणमेव पठनपाठनप्रचारेषु सर्वत्र प्रायः दरीदृश्यते। अस्माकं मनसीदानीं विचिकित्सा समुदेति यत् किं पाणिनेः व्याकरणाद् प्रागपि व्याकरणान्यासन्, पाणिनेः व्याकरणाद् अनन्तरं नूतनानि व्याकरणानि समुत्पन्नानि इति। बाढम्। पाणिनिव्याकरणाद् प्रागपि व्याकरणान्यासन्, पाणिनिव्याकरणाद् अनन्तरमपि नूतनानि व्याकरणानि समुत्पन्नानि च। यद्यपि पाणिनिव्याकरणात् पूर्वकाले उत्तरकाले च बहूनि व्याकरणानि कृतानि स्युः, तथापि लोके नवव्याकरणानि प्रसिद्धिं गतानि दृश्यन्ते। तानि लोकप्रसिद्धिं गतानि नवव्याकरणानि तावत्–

ISSN 976-8645

**एन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**

**सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।**[९]– इति।।

इदानीं मया शाकटायनव्याकरणे विद्यमानस्य द्वितीयातत्पुरुषसमासस्य पाणिनिव्याकरणस्य द्वितीयातत्पुरुषसमाससूत्रैः तुलनात्र शोधप्रबन्धे क्रियते। तथा चास्माकं मनसि शीर्षकमिदं श्रुत्वैव सद्यः विचिकित्साः समुपजायन्ते यत्, किमयं शाकटायनः पाणिनेरनुयायी, अथवा पाणिनेः पूर्वकालिकः इति। पाणिनिना **लङ शाकटायनस्यैव**[१०], **त्रिप्रभृतिषु शाकटायनस्य**[११], **द्विषश्च**[१२] इत्येतस्मिन् सूत्रत्रितये समुल्लिखितः शाकटायनः एव किमस्य व्याकरणस्य कर्ता, उत, सूत्रत्रितये उल्लिखितात् शाकटायनात् **शाकटायनव्याकरणकर्ता** इतरः इति। कस्मिन् काले अयमुवास, व्याकरणमिदं लिलेख इति। एतेषु विषयेषु पाश्चात्यैः संशोधकैः विद्वद्भिः संशोधनं व्यधायि। **डॉ. बुह्लर्, ए. सी. बर्नल्, एफ. कील्हार्न, जी. आप्टे** इत्यादयः पाश्चात्यसंशोधकविद्वांसः एतेषु विषयेषु संशोधनं व्यदधुः। तेषु **एफ. कील्हार्न** महाशयः **शाकटायनव्याकरणकर्ता** शाकटायनः पाणिनेः अनुयायी इति निजविहितसंशोधने निर्णिनाय। तत्र प्रमाणमप्युपतस्थौ। तच्च प्रमाणमित्थं–चन्द्रेण प्रणीतं व्याकरणं **चान्द्रव्याकरणमिति** प्रसिद्धम्। चान्द्रव्याकरणं पतञ्जलेः महाभाष्यादपि अर्वाचीनमेव इति **एफ. कील्हार्न** महाशयेन १८८६ तमे संवत्सरे निजलिखिते शोधप्रबन्धे अवादि। १८८७ तमे संवत्सरे **एफ. कील्हार्न** आत्मरचितशोधप्रबन्धे अवोचत्–**शाकटायनः स्वव्याकरणेऽपि प्रायेण पाणिनिव्याकरणोल्लिखिताः संज्ञाः एव उल्लिखितवान्। गुणः, वृद्धिः, संप्रसारणम्, उपधा, टि, निपातः, सर्वनाम इत्येतासां संज्ञानां परित्यागे,** तथा, **संज्ञायाम् इत्यस्य स्थाने नाम्नि** इति **उपदेशे** इत्यस्य स्थाने **पाठः** इति स्वीकारे च शाकटायनः चन्द्रम् अनुसरित। अतः इदं स्पष्टं विज्ञायते यत् शाकटायनः चन्द्रादपि अर्वाचीन इति, पाणिनेरप्यर्वाचीन इति न वचसाख्येयम्। तथा च पाणिनिः स्वसूत्रेषु उल्लिखितः शाकटायनः **शाकटायनव्याकरणकर्ता शाकटायनः** च एकः भवितुं नार्हति। एवञ्च द्वयोः प्राचीनार्वाचीनशाकटायनयोः सत्त्वे प्रमाणीकृते सति को वा अस्य शाकटायनशब्दानुशासनस्य कर्ता ? को वा पाणिनिसूत्रेषु उल्लिखितः शाकटायनः ? इति प्रश्नस्य समाधिस्तु **एफ. कील्हार्न** महाशयेन स्वरचित शोधप्रबन्धे निश्चिकाय। **एफ. कील्हार्न** महाशयः तत्र इतरदपि प्रमाणमपि निरदिशत्। पाणिनिव्याकरणे अष्टाध्याय्यां तृतीयस्मिन्नध्याये तुरीये पादे एकादशोत्तरशतं सूत्रं भवति **लङ शाकटायनस्यैव, द्विषश्च** इति। **आकारान्तात् धातोः परस्य लङः झेर्जुस् स्यात् शाकटायनमते, द्विष् धातोः परस्य लङः झेर्जुस् स्यात्** इति अनयोःसूत्रयोरर्थः। तथा च शाकटायनमते झेर्जुसि कृते अयुःअपुः इत्यादिरूपसिद्धिः, अद्विषुरिति रूपसिद्धिः भवति। पाणिनीयमतरीत्या अयन्, अद्विषन् इति रूपं सिद्ध्यति।

शाकटायनः स्वव्याकरणे एतत्समानार्थप्रतिपादकं प्रथमाध्याये चतुर्थपादे **आद्विषो झेर्जुस् वा**[१३] इति सूत्रं प्रोवाच। तथा च तस्मिन्नपि मते अयुः, अद्विषुः, अयन् अद्विषन् इति रूपाणां

ISSN 976-8645

सिद्धिर्भवति। यदि पाणिनिसूत्रोल्लिखितः शाकटायन एतद्व्याकरणकर्ता शाकटायनश्चैक एव स्यात्, तर्हि शाकटायनशब्दानुशासनस्थे **आद्विषो झेर्जुस् वा** इति सूत्रे वा शब्दोऽनर्थकः स्यात्। यत अयुः, अद्विषुरिति रूपे एव शाकटायनेन अभिप्रैषाताम्। पाणिनिनापि ते रूपे ऐक्षाताम्। पाणिनिमतानुसारम् अयन् अद्विषन् इति रूपद्वयमपि इष्टम्। एवं सति **लङः शाकटायनस्यैव** इति सूत्रेण उभयविधानि रूपाणि सिद्ध्यन्ति। तथा च शाकटायनस्य कृतजुसादेशस्य रूपस्यैव सम्मतत्वात् उभयविधरूपसंसाधकतया सूत्रप्रणयनम् असङ्गतमेव स्यात्। शाकटायनेन **आद्विषो झेर्जुस्** इत्येव सूत्रं प्रणयेत। तथा च उभयविधरूपसिद्धिहेतुभूततया सूत्रप्रणयने **वा** शब्दोपादानं निरर्थकमेव इति वेदनीयम्। एवञ्च प्रमाणेनानेन पाणिनिसूत्रोल्लिखितः शाकटायनः शाकटायनशब्दानुशासनकर्तुः व्यतिरिच्यते, न तु समः इति कील्हार्न महाशयः प्रास्तौत्।

**शाकटायनस्य कालः-**

शाकटायनः **ख्याते दृश्ये**[१४] इति सूत्रस्य स्वप्रणिबद्धायाम् **''अमोघवृत्तौ'' देवः अरुणद् पाण्ड्यम्, अदहत् अमोघवर्षो रतिन्** इति द्वे उदाहरणे उदाजहार। आभ्याम् उदाहरणाभ्यां शाकटायनस्य कालपरिज्ञानं भवति। तदत्र निरूप्यते-उदाहरणयोः अनयोः, शाकटायनः अरुणद्, अदहत् इति लङ्लकारप्रयोगम् अकरोत्। **देवः अरुणद् पाण्ड्यम्, अदहत् अमोघवर्षो रतिन्** इति वाक्याभ्यां बोध्यमाने इमे केचित् ऐतहिासिकघटने वर्तेते। तादृशौ इमे घटने अरुणद्, अदहत् इति लङ्लकारप्रयोगेन **ख्याते दृश्ये** इति सूत्रे उदाजहार। लङ्लकारेन क्रियायाः प्रतिपादनं तत्क्रियायाः अपरोक्षत्वे एव संभवति, अर्थात् तत्क्रियायाः प्रत्यक्षत्वे एव संभवति। तथा च लङ्लकारेन उदाहरणात् वयम् इदं ज्ञातुं शक्नुमः यत् तदुदाहरणप्रतिपादिते क्रिये ग्रन्थरचयित्रा प्रत्यक्षीकृते इति। इयमेव ऐतिहासिकी घटना **८३२ विक्रमशके काले ( 910/11 A.D. )** निर्दिष्टे **राष्टकूटशिलालेखे** च प्रतिपादिता वर्तते। तत्र हि **भूपालान् कण्ठकाभान् वेष्टयित्वा ददाह** इति दृश्यते। तत्र शिलालेखे ददाह इति लिट्लकारस्य प्रयोगः दृश्यते। लिट्लकारेन क्रियायाः प्रतिपादनं तत्क्रियायाः परोक्षत्वे एव संभवति, अर्थात् तत्क्रियायाः अप्रत्यक्षत्वे एव संभवति। तथा च लिट्लकारेन तत्र शिलालेखे दहनक्रियायाः उल्लेखात् वयम् इदं ज्ञातुं शक्नुमः यत् तस्य शिलालेखस्य रचयित्रा सा घटना न साक्षात् दृष्टा इति। तथा च शाकटायनेन निजप्रनिबद्धायाम् **अमोघवृत्तौ** लङ्लकारेण तयोः ऐतिहासिक्योः घटनयोः प्रतिपादनात्, ते घटने शाकटायनः साक्षात् ददर्श इति। तथा च शाकटायनः **अमोघवर्षस्य समकाले** उवास, उषित्वा **अमोघवृत्तिं** च रचयामास इति सुस्पष्टम् अवबुध्यते एव। अमोघवर्षेण पोषितोऽयं शाकटायनः। अत एव शाकटायनः निजप्रनिबद्धसूत्रार्थप्रतिपादकस्य ग्रन्थस्य **अमोघा वृत्तिः** इति नाम चकार। तथा चेयम् अमोघवत्तिः, शाकटायनेन ७३६ संवत्सरात् ७८९ संवत्सरस्य मध्ये काले (८१४/५-८६/८ **A.D.**) रचयाञ्चक्रे इत्यनुमीयते। तेन अयमपि विषयः अवगन्तुं शक्यः यत् शाकटायनः अमोघवर्षस्य

A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14 ISSN 976-8645

समकालिकः आसीदिति। **देवः अरुणद् पाण्ड्यम्** इत्युदाहरणे अमोघवर्षस्य पुत्रः कृष्णराजः देवशब्देन ख्यायते। चितलदुर्गशिलालेखे ८५९ विक्रमशकसंवत्सरे देवः कृष्णराजः पाण्ड्यम् अहन् इति उल्लिखितोऽस्ति। अथवा देवः इति अमोघवर्षस्यैव अपरं नाम भवति। तत्र च प्रमाणम् उपलभ्यते, तद्धि जिनसेनः **पार्श्वाभ्युदयाख्ये** ग्रन्थे **भुवनम् अवतु देवः सर्वदामोघवर्षः** इति। अतः देवशब्देन अमोघवर्षोऽप्युच्यते। तथा च शाकटायनः अमोघवर्षस्य समकालिकः आसीदिति स्पष्टमेव।

**अथ पाणिनिव्याकरणे द्वितीयातत्पुरुषविधायकानि सूत्राणि–**

द्वितीयान्तस्य समर्थेन सुबन्तेन समासः षड्भिः सूत्रैःविहितः। तेषामर्थः अत्रोच्यते–

१. **द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** (२-१-२४) इति। **सह सुपा** इत्यतः सुपा इत्यनुवर्तते। द्वितीया इति द्वितीयाविभक्तेः संज्ञा। अतः **प्रत्ययग्रहणे यस्मात् स विहितः तदादेः तदन्तस्य ग्रहणम्**[२५] इति परिभाषया द्वितीयान्तस्य ग्रहणम्। सुपा इत्यत्रापि **प्रत्ययग्रहणे यस्मात् स विहितः तदादेः तदन्तस्य ग्रहणम्** इति परिभाषया सुबन्तस्य ग्रहणम्। अतः सुबन्तेनेति लभ्यते। तच्च बहुवचनान्ततया परिणमते। तस्य च श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्येतद्विशेषणम्। यद्यपि सुबन्तेन इत्यस्य श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्येतद्विशेषणम् तथापि **येन विधिस्तदन्तस्य**[१६] इत्यनेन न तदन्तविधिः, **समासप्रत्ययविधौ प्रतिषेधः**[१७] इति वार्त्तिकेन समासकार्येषु तदन्तविधिनिषेधबोधनात्। तथा च **द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह समस्यते, स तत्पुरुषः** इति तदर्थः। अस्योदाहरणानि कृष्णं श्रितः कृष्णश्रितः, दुःखम् अतीतः दुःखातीतः,गर्तं पतितः गर्तपतितः इत्यादीन्युदाहरणानि।

२. **स्वयं क्तेन** (२-१-२५) द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यस्मात् सूत्रात् द्वितीया इत्यनुवर्तते। सुपा इति चानुवर्तते। क्तः इति कृत्प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया क्तान्तं गृह्यते। तथा च **स्वयम् इत्येतदव्ययं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते** इति तदर्थः। स्वयम् इत्यव्ययस्य समासे असमासे वा रूपे भेदाभावात् कृततत्पुरुषात् तद्धितान्तम् उदाहरति स्वयं कृतस्यापत्यं स्वायंकृतिः इति।

३. **खट्वा क्षेपे** (२-१-२६) द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यस्मात् सूत्रात् द्वितीया इत्यनुवर्तते। सुपा इति चानुवर्तते। स्वयं क्तेन इत्यतः क्तेन इति चानुवर्तते। तथा च **खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते निन्दायाम्** इति तदर्थः। खट्वारूढो जाल्मःइत्युदाहरणम्।

४. **सामि** (२-१-२७) सामि इत्यव्ययम् अर्धे वर्तते। सुपा इति चानुवर्तते। स्वयं क्तेन इत्यतः क्तेन इति चानुवर्तते। तथा च **सामि इत्येतदव्ययम् क्तान्तप्रकृतिकेन सुबन्तेन समस्यते** इति तदर्थः। सामिकृतम् इत्युदाहरणम्।

ISSN 976-8645

५. **काला:** (२-१-२८) द्वितीया इत्यनुवर्तते। सुपा इति अनुवर्तते। स्वयं क्तेन इत्यत: क्तेन इति चानुवर्तते। उत्तरसूत्रेण अत्यन्तसंयोगे समासविधानात् इदं वचनम् अनत्यन्यसंयोगे समासार्थम्। तथा च **कालवाचकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते** इति तदर्थ:। मासं प्रमित: मासप्रमित: इत्युदाहरणम्।

६. **अत्यन्तसंयोगे च** (२-१-२९) काला: इत्यनुवर्तते। द्वितीया इत्यनुवर्तते। सुपा इति अनुवर्तते। अक्तान्तेन समासार्थमिदं वचनम्। तथा च **कालवाचकं द्वितीयान्तं समर्थेन सुबन्तेन समस्यते अत्यन्तसंयोगे** इति तदर्थ:। मूहूर्तं सुखं मूहूर्तसुखम् इत्यादीन्युदाहरणानि।

**अथ शाकटायनस्य तत्पुरुषसमासविधायकानि सूत्राणि**

**१. स्वयं सामि क्तेन ( २.१.२९ ) सुप् सुपा समासो बहुलम्**[१९] इत्यधिक्रियते। प्रत्ययग्रहणपरिभाषया सुबन्तम् इति क्तेन इत्यनेन क्तान्तेन इति च लब्धम्। एवञ्च स्वयं सामि इत्येतदव्ययद्वयं क्तान्तप्रकृतिकसुबन्तेन वा समस्यते। तदुक्तं **स्वयं सामि इत्येतौ सुबन्तौ क्तप्रत्ययान्तेन सुपा सह समस्येते वा स तत्पुरुषश्च समासो भवति** इति। स्वयंधोतौ, स्वयंविलीनम् इत्यादीन्युदाहरणानि। सामिकृतं, सामिभुक्तम् इत्यादीन्युदाहरणानि।

**तुलना**-पाणिनि: अस्मिन् विषये **स्वयं क्तेन, सामि** इति पृथग्पृथग् द्वे सूत्रे व्यरचयत्। सामि इति सूत्रे **स्वयं क्तेन** इत्यत: क्तेन इत्यनुवर्तते। तथा च पाणिन्यपेक्षया शाकटायन: अत्र सूत्रसंख्यायां लाघवम् अकरोदिति वक्तुं शक्यम्। क्तेन इति पदाननुवृत्त्यावश्यकता च नास्ति शाकटायनव्याकरणे।

**२. द्वितीया खट्वा क्षेपे ( २.१.३० ) सुप्सुपा समासो बहुलम्** इत्यधिक्रियते। द्वितीया इति अमौट्छसां त्रयाणां प्रत्ययानां संज्ञा प्राचीनोक्ता शकाटायनेनापि स्वीकृता। तथा द्वितीया इत्यनेन प्रत्ययग्रहणपरिभाषया द्वितीयान्तं गृह्यते। एवं सुप्सुपा इत्यनेन प्रत्ययग्रहणपरिभाषया सुबन्तं गृह्यते। क्तेन इत्यनुवर्तते **स्वयं सामि क्तेन** इति सूत्रात्।

एवं क्तेन इत्यत्रापि तया परिभाषया तदन्तग्रहणम्। तथा च क्तान्तेन इत्यर्थ: लब्ध:। द्वितीया इति खट्वा इत्यस्य विशेषणम्। तथा च द्वितीयान्तं खट्वा इत्येतद् सुबन्तं क्तान्तप्रकृतिकसुबन्तेन समस्यते क्षेपे निन्दायां गम्यमानायाम्। खट्वाम् आरुढ: खट्वारुढ: जाल्म:। क्षेपे एवायं समास:। तदुक्तं **खट्वा इत्येतद् द्वितयान्तं क्तान्तेन सुपा सह समस्यते क्षेपे निन्दायां गम्यमानायां स च समाम: तत्पुरुषसंज्ञो भवति** इति।

**तुलना**-पाणिनिना अत्र **खट्वा क्षेपे** इति सूत्रं कृतं वर्तते। तत्र **द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तान्नै:,** सूत्रात् द्वितीया इत्यनुवर्तते। अत्र शाकटायनव्याकरणे द्वितीया खट्वा क्षेपे इत्येकं सूत्रम्। श्रितादिभि: इत्यपरम्। तत्र द्वितीया खट्वा क्षेपे इत्यत: द्वितीया इत्यनुवर्तते।

ISSN 976-8645

पाणिनीयशब्दानुशासने **द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः, स्वयं क्तेन, खट्वा क्षेपे, सामि, कालाः, अत्यन्तसंयोगे च** इति सूत्रक्रमः। अत्र द्वितीया इति पदं मण्डूकप्लुत्या खट्वा क्षेपे, कालाः इत्यत्र च संबध्यते। एवं क्तेन इति पदं अग्रिमेषु त्रिषु सूत्रेषु संबध्यते। शाकटायनशब्दानुशासने **स्वयं सामि क्तेन, द्वितीया खट्वा क्षेपे, कालः, व्याप्तौ, श्रितादिभिः** इति सूत्रक्रमः वर्तते।

शाकटायनमते अत्र अनुवृत्तिलाघवं दृश्यते। द्वितीया इति पदं त्रिषु सूत्रेषु अनुवर्तते। एवं मण्डूकप्लुत्याश्चाश्रयणं विना द्वितीया इति पदमनुवर्तते इति अत्र लाघवम् अस्ति।

**३. कालः ( २.१.३१ ) द्वितीया खट्वा क्षेपे** इत्यतः द्वितीया इति **स्वयं सामि क्तेन** इत्यतः क्तेन इति, **सुप्सुपा समासो बहुलम्** इति च अनुवर्तते। प्रत्ययग्रहणपरिभाषया तदन्तविधिः। तथा च द्वितीयान्तं कालवाचकं सुबन्तं क्तान्तप्रकृतिकसुबन्तेन सह वा समस्यते इत्यर्थः सिद्धः। तदुक्तं **कालवाचि द्वितीयान्तं क्तान्तेन सुपा सह समस्यते वा स च समासः तत्पुरुषसंज्ञो भवति** इति। अहः अतिसृताः अहरतिसृताः, रात्रिं संक्रान्ताः रात्रिसंक्रान्ताः, रात्रिम् आरूढाः रात्र्यारूढाः। मासं प्रमितः मासप्रमितः चन्द्रमाः, इत्यादीन्युदाहरणानि।

उत्तरत्र **व्याप्तौ** इति सूत्रेण कालवाचकस्य व्याप्तौ समासो विधीयते। कालवाचकस्य सर्वेषु अर्थेषु कालः सूत्रेणैव समासे सिद्धे कालः इति सूत्रम् अव्याप्तौ अनत्यन्तसंयोगे समासार्थम्।

**तुलना**–पाणिनीयशब्दानुशासने **कालाः ( २.१. )** इति सूत्रं दृश्यते। कालवाचकं सुबन्तं क्तान्तप्रकृतिकसुबन्तेन सह वा समस्यते इति तदर्थः। मासं प्रमितः मासप्रिमतः प्रतिपच्चन्द्रः। उत्तरत्र **अत्यन्तसंयोगे च** इति सूत्रेण कालवाचकस्य अत्यन्तसंयोगे समासविधानात् कालाः इति सूत्रम् अनत्यन्तसंयोगार्थम्। अत्र पाणिनिसूत्रशाकटायनसूत्रयोः नास्ति महान्भेदः। परन्तु कालः इति जातौ एकवचनान्तप्रयोगेन शाकटायनः मात्रायां लघुतां संपादयति। कालविशेषवाचकग्रहणाय पाणिनिः बहुवचनान्तं प्रयुक्तवान् इति वैलक्षण्यम्।

**४. व्याप्तौ ( २.१.३२ ) द्वितीया खट्वा क्षेपे** इत्यतः द्वितीया इति **सुप्सुपा समासो बहुलम्** इति चाधिक्रियते। प्रत्ययग्रहणपरिभाषया तदन्तविधिः। तथा च द्वितीयान्तं कालवाचकं सुबन्तं सुबन्तेन सह वा समस्यते इत्यर्थः सिद्धः। आरम्भात् अस्य सूत्रस्य क्तेन इति निवृत्तम्। अन्यथा कालः इति सूत्रेणैव सिद्धं स्यात्। तदुक्तं **व्याप्तौ या द्वितीया तदन्तः कालवाचकशब्दः व्यापकवाचिना सुपा सह समस्यते स तत्पुरुषश्च समासो भवति** इति। मुहूर्तं सुखं मुहूर्तसुखम्, मुहूर्तं रमणीयः मुहूर्तमणीयः, सर्वरात्रं कल्याणी सर्वरात्रकल्याणी।

**तुलना**–पाणिनिः **अत्यन्तसंयोगे च** इति सूत्रमकरोत्। अत्रापि क्तेन इति निवर्तते आरम्भसामर्थ्यात्। अत्र शाकटायनः अत्यन्तसंयोगार्थे व्याप्तौ इति पदं प्रयुज्य, पाणिन्यपेक्षया मात्रायां लाघवं संपादयति।

ISSN 976-8645

**५. श्रितादिभिः ( २.१.३३ ) सुप्सुपा समासो बहुलम्,** द्वितीया इति चानुवर्तते। प्रत्ययग्रहणपरिभाषया तदन्तविधिः। तथा च द्वितीयायान्तं सुबन्तं श्रितादिभिः सुबन्तैः सह समस्यते। तदुक्तं **द्वितीयायाः यः सुप् श्रितादिभिः सुबन्तैः सह वा समस्यते स तत्पुरुषश्च समासो भवति** इति। धर्मं श्रितः धर्मश्रितः, श्रियं श्रितः श्रीश्रितः, दुखम् अतीतः दुःखातीतः, नरकं पतितः नरकपतितः। श्रितादिगणे श्रित, अतीत, गत, अत्यस्त, प्राप्त, आपन्न, गमिन्, गामिन् एते शब्दाः उपलभ्यन्ते। आकृतिगणश्चायम्। तेन बुभुत्सु, बुभुक्षु शब्दानाञ्चान्तर्भावः सिद्ध्यति। तेन तत्त्वं बुभुत्सुः तत्त्वबुभुत्सुः, अन्नं बुभुक्षुः अन्नबुभुक्षुः इत्यादीनि रूपाणि सिद्ध्यन्ति।

**तुलना**–पाणिनिना **द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** इति सूत्रं प्रणिबद्धम्। अत्र पाणिनीयशब्दानुशासने श्रितादयः शब्दाः पृथक् पृथक् पठिताः। गणत्वेन न तेषां संग्रहः। परन्तु ग्रामं गमी ग्रामगमी, अन्नं बुभुक्षुः अन्नबुभुक्षुः इत्यादिरूपाणां सिद्धिः **गम्यादीनाम् उपसंख्यानम्** इति वार्त्तिकेन जायते। तत्र गणे गम्यादयः शब्दाः प्रक्षिप्ताः। शाकटायनस्तु श्रितादिगणे एव गम्यादिगणपठितान् शब्दान् समगृह्णात्। तथा च वार्त्तिकलब्धफलञ्च सिद्ध्यति इति पाणिनीये इव वार्त्तिकापेक्षा नास्ति इति साधु।

तथा च शाकटायनव्याकरणे **स्वयं सामि क्तेन, द्वितीया खट्वा क्षेपे, कालः, व्याप्तौ, श्रितादिभिः** इति द्वितीयातत्पुरुषेषु सूत्राणि वर्तन्ते। पाणिनीयशब्दानुशासनापेक्षया सूत्रसंख्यायाम्, अनुवृत्तौ, मात्रायाञ्च लाघवम् अस्ति अत्र। किञ्च वार्त्तिककारकात्यायनोक्त वार्त्तिकफलान्यपि सूत्रेणैव संगृहितानि इति अत्युत्तमम्।

## अन्तटिप्पणी

१. पाणिनीयशिक्षायां पद्यसंख्या ४१,४२
२. दण्डिविरचिते **काव्यादर्शे** प्रथमपरिच्छेदे पद्यसंख्या ४
३. श्रुतिवाक्यम् (६.१.८४) **महाभाष्ये** पस्पशाह्निकम् **प्रदीप** व्याख्या चौखम्बासंस्कृतप्रतिष्ठानेन प्रकाशितं पुटसंख्या ७२
४. **महाभाष्यम्** पस्पशाह्निकम् चौखम्बासंस्कृतप्रतिष्ठानेन प्रकाशितं पुटसंख्या २०
५. विश्वनाथपञ्चाननविरचिते चौखम्भाप्रकाशनप्रकाशित **न्यायसिद्धान्तमुक्तावल्यां** शब्दखण्ड
६. **महाभाष्यम्** पस्पशाह्निकम् चौखम्भाप्रकाशनप्रकाशितं पुटसंख्या २३
७. **सुभाषितरत्नभाण्डागारः** वैयाकरणस्यप्रशंसा चौखम्भाप्रकाशनप्रकाशित प्रकाशितं पद्यसंख्या २

८. **महाभाष्यम्** पस्पशाह्निकम् **अथ शब्दानुशासनम्** इति वार्त्तिकम्। अनेन प्रतीयते शब्दानुशासनम् इति अपरं नाम इति।

९. तिरुपति राष्ट्रिसंस्कृतविद्यापीठप्रकाशित **लघुशब्देन्दुशेखरस्य** व्याख्या श्रीपादसत्यनारायणशास्त्रिविरचित **बालबोधिन्यां प्रस्तावनायाम्** उल्लिखितं पद्यम्

१०. अष्टाध्यायी सूत्रसंख्या ३.४.१११

११. अष्टाध्यायी सूत्रसंख्या ८.४.५०

१२. अष्टाध्यायी सूत्रसंख्या ३.४.११२

१३. **शाकटायनशब्दानुशासनम्** सूत्रसंख्या १.४.१०६

१४. **शाकटायनशब्दानुशासनम्** सूत्रसंख्या ४.३.२०८

१५. नागेशभट्टविरचित **परिभाषेन्दुशेखरे** परिभाषासंख्या १३

१६. **अष्टाध्यायी** सूत्रसंख्या ३.४.११२

१७. भट्टोजिदीक्षितविरचित **वैयाकरणसिद्धान्तकौमुद्यां** प्रथमभागे **येन विधिस्तदन्तस्य** सूत्रे वर्तते। सूत्रसंख्या १३

१८. शाकटायनशब्दानुशासनम् सूत्रसंख्या २.१.१

# सन्दर्भग्रन्थसूची


1. शाकटायनशब्दानुशासनम्, सम्पा. पं. शम्भुनाथ त्रिपाठी, भारतीय ज्ञानपीठ प्रकाशन, 1971
2. वैयाकरणसिद्धान्तकौमुदी, सम्पा. गिरिधरशर्मा, मोतीलाल बनारसीदास, दिल्ली
3. अष्टाध्यायीसूत्रपाठः, सम्पा. सत्यनारायण शास्त्री खन्दूरी, कृष्णदास अकादमी, वाराणसी
4. व्याकरणमहाभाष्यम्, सम्पा. भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी 2011
5. Dictionary of Sanskrit Grammar, ed. BJ Gandesara, Driental Institute Barauda 1961